
# मातृभक्त: चाणक्य:

(लृट् प्रयोग:)

(शिशु-चाणक्यस्य मात्रा सह सम्भाषणम्)



चाणक्य: - मात: ! त्वं क्रन्दसि ?

माता - आं पुत्र ! तव सौभाग्यं दृष्ट्वा क्रन्दामि ।

चाणक्य: - कीदृशं सौभाग्यम् ?

माता - तव हस्तेन मगधस्य निर्माणं **भविष्यति ।**

चाणक्य: - किन्तु मात: ! अहं किं **करिष्यामि ?**

माता - पुत्र ! त्वं मगधस्य प्रधानामात्य: **भविष्यसि ।**

चाणक्य: - मात: ! त्वम् एतत् कथं ज्ञातवती ?

माता - (दर्पणं प्रदर्श्य) पश्य पुत्र ! तव सम्मुखदन्ते सौभाग्यस्य चिह्नम् अस्ति ।

चाणक्य: - किन्तु मात: ! एष: तु आनन्दस्य विषय: । त्वं किमर्थं क्रन्दसि ?

माता - अरे ! समाजे एवं दृश्यते । यदा जना: ज्येष्ठा: श्रेष्ठा: च भवन्ति, तदा निजलोकान् न पृच्छन्ति । विस्मरन्ति एव । तथैव त्वं मां **विस्मरिष्यसि ।** एषा हि मम दुश्चिन्ता । (इति कथयित्वा दु:खं प्रकटितवती)

चाणक्य: - 'एवं वा ?' इति कथयन् बाल: चाणक्य: प्रस्तरेण दन्तम् उत्पाटितवान् । क्षणेन एव मातु: दु:खं दूरीकृतवान् । एतत् दृष्ट्वा माता आश्चर्यान्विता अभवत् । तस्या: नेत्राभ्यां लोतकबिन्दव: निर्गता: ।

माता - ''पुत्र ! तव हस्तेन मातृभूमे: मङ्गलं **भविष्यति ।** देशस्य इतिहासे तव नाम **स्थास्यति** । लोका: त्वां सर्वदा **स्मरिष्यन्ति** । एतद् मम आशीर्वचनम्।

कालान्तरे एष: चाणक्य: कौटिल्यरूपेण ख्यात: अभवत् । स: राजनीति - शास्त्राणि अर्थशास्त्राणि च संस्कृतेन रचितवान्, नन्दवंशस्य विलोपं च कृतवान् । चन्द्रगुप्तस्य हस्ते शासनभारम् अर्पितवान् । स: रामायणस्य वाक्यम् उद्घोषितवान् -

**''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।''**

| |
|---|
| **सौभाग्यम्, प्रधानामात्य:, कथयन्, दन्तम्, क्षणेन, गरीयसी** |

# टिप्पणी

**शब्दार्थः -**

सौभाग्यम् - उत्तमभाग्यम् - (ଉତ୍ତମଭାଗ୍ୟ), ज्ञातवती - अवगतवती (ଜାଣିଲା), विस्मरिष्यसि - विस्मरणं करिष्यसि (ଭୁଲିଯିବୁ), उत्पाटितवान्- उत्पाटनं कृतवान् - (ଉପାଡ଼ିଦେଲେ), रचितवान् - लिखितवान् (ଲେଖିଲେ) ।

## अभ्यास :

१. **उच्चैः पठत, लिखत ।**

**लृट्लकारः (भविष्यत्कालः)**

| **उदाहरणम्-** | | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
|---|---|---|---|---|
| **एकवचनम्** | **(पठ्) -** | **सः/सा/बालकः/बालिका पठिष्यति** | **त्वं पठिष्यसि** | **अहं पठिष्यामि** |
| **शून्यस्थानं पूरयत** | | | | |
| | (हस्) - | .................. | .................. | .................. |
| | (गम्) - | .................. | .................. | .................. |
| | (भ्रम्) - | .................. | .................. | .................. |
| | (खेल्) - | .................. | .................. | .................. |
| | (कृ) - | .................. | .................. | .................. |
| **द्विवचनम्** | | **- तौ/ते/बालकौ/बालिके पठिष्यतः** | **युवां पठिष्यथः** | **आवां पठिष्यावः** |
| **शून्यस्थानं पूरयत** | | | | |
| | (हस्) - | .................. | .................. | .................. |
| | (गम्) - | .................. | .................. | .................. |
| | (भ्रम्) - | .................. | .................. | .................. |
| | (खेल्) - | .................. | .................. | .................. |
| | (कृ) - | .................. | .................. | .................. |

| | | | |
|---|---|---|---|
| **बहुवचनम्** | **- ते/ताः/बालकाः/बालिकाः पठिष्यन्ति** | **यूयं पठिष्यथ** | **वयं पठिष्यामः** |

**शून्यस्थानं पूरयत**

| | | | |
|---|---|---|---|
| (हस्) - | ................. | ................. | ................. |
| (गम्) - | ................. | ................. | ................. |
| (भ्रम्) - | ................. | ................. | ................. |
| (खेल्) - | ................. | ................. | ................. |
| (कृ) - | ................. | ................. | ................. |

## दृश्-धातुः

**शून्यस्थानं पूरयत**

| | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
|---|---|---|---|
| **एकवचनम् -** | बालकः द्रक्ष्यति | त्वं ............... | अहं द्रक्ष्यामि |
| **द्विवचनम् -** | बालकौ ............... | युवां द्रक्ष्यथः | आवां ............... |
| **बहुवचनम् -** | बालकाः द्रक्ष्यन्ति | यूयं ............... | वयं द्रक्ष्यामः |

## कृ-धातु

| | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
|---|---|---|---|
| **एकवचनम् -** | करिष्यति | ............... | करिष्यामि |
| **द्विवचनम् -** | करिष्यतः | करिष्यथः | ............... |
| **बहुवचनम् -** | ............... | करिष्यथ | करिष्यामः |

## स्था-धातुः

| | **प्रथमपुरुषः** | **मध्यमपुरुषः** | **उत्तमपुरुषः** |
|---|---|---|---|
| **एकवचनम् -** | स्थास्यति | ............... | स्थास्यामि |
| **द्विवचनम् -** | स्थास्यतः | स्थास्यथः | ............... |
| **बहुवचनम् -** | ............... | ............... | स्थास्यामः |

**नी-धातुः**

| | प्रथमपुरुषः | मध्यमपुरुषः | उत्तमपुरुषः |
|---|---|---|---|
| **एकवचनम्-** | नेष्यति | नेष्यसि | नेष्यामि |
| **द्विवचनम्-** | ............... | ............... | ............... |
| **बहुवचनम्-** | ............... | ............... | ............... |

२. **उदाहरणानुसारं शून्यस्थानं पूरयत ।**

**यथा :** अहं ग्रामं गमिष्यामि । (गम्-लृट्)

(क) भिक्षुकः स्नानं ____________ । (कृ-लृट्)

(ख) माता भोजनं ____________ । (दा-लृट्)

(ग) बालकः क्रीडाप्रान्तरे ____________ । (खेल्-लृट्)

(घ) शिक्षकः कथां ____________ । (कथ्-लृट्)

३. **बन्धनीमध्यस्थ यथार्थपदैः शून्यस्थानानि पूरयत ।**

(क) विद्यालयेषु छात्राः ____________ । (पठिष्यति, पठिष्यतः, पठिष्यन्ति)

(ख) प्रधानमन्त्री दिल्ल्यां ____________ । (स्थास्यामि, स्थास्यसि, स्थास्यति)

(ग) वानराः अरण्ये ____________ । (खेलिष्यामि, खेलिष्यसि, खेलिष्यन्ति)

(घ) त्वं रन्धनं ____________ । (करिष्यसि, करिष्यामि, करिष्यति)

(ङ) लोकयाने सम्मर्दः ____________ । (भविष्यथ, भविष्यति, भविष्यन्ति)

४. **उचितेन पदेन शून्यस्थानं पूरयत ।**

(क) तव हस्तेन मगधस्य निर्माणं ____________ ।

(ख) किन्तु मातः ! अहं किं ____________ ?

(ग) त्वं मगधस्य प्रधानामात्यः ____________ ।

(घ) पुत्र ! तव हस्ते मातृभूमेः मङ्गलं ____________ ।

(ङ) लोका: त्वां सर्वदा ____________ ।

(च) देशस्य इतिहासे तव नाम ____________ ।

(छ) ____________ जन्मभूमिश्च स्वर्गादपि गरीयसी ।

५. **मातृभाषया अनुवादं कुरुत ।**

(क) तव हस्तेन मगधस्य निर्माणं भविष्यति ।

(ख) मात: ! त्वम् एतत् कथं ज्ञातवती ?

(ग) तव सम्मुखदन्ते सौभाग्यस्य चिह्नम् अस्ति ।

(घ) त्वं किमर्थं क्रन्दसि ?

(ङ) तथैव त्वं मां विस्मरिष्यसि ।

(च) एषा एव मम दुश्चिन्ता ।

(छ) बाल: चाणक्य: दन्तम् उत्पाटितवान् ।

(ज) क्षणेन एव मातु: दु:खं दूरीकृतवान् ।

(झ) तस्या: नेत्राभ्यां लोतकबिन्दव: निर्गता: ।

(ञ) चाणक्य: कौटिल्यरूपेण ख्यात: अभवत् ।

६. **शुद्धशब्दं रचयत ।**

| | | |
|---|---|---|
| यथा - म ध ग स्य | - | मगधस्य |
| (क) क क्षु स्य भि | - | ..................... |
| (ख) मा स प्त म् | - | ..................... |
| (ग) र म्प रा प | - | ..................... |
| (घ) क्य: ण चा | - | ..................... |
| (ङ) हा से इ ति | - | ..................... |

●